**International Journal of Research in Social Sciences**
Vol. 8 Issue 10, October 2018,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# शब्दार्थसम्बन्धविचारः

डॉ. कैलासचन्द्रदाशः
सहायकाचार्यः

शब्दादर्थस्य बोधो ज्ञायते इति सर्वानुभवविषयोऽयम्। तत्रापि केषाञ्चन शब्दश्रवणेन अर्थसम्प्रत्ययः भवति चेत् केषाञ्चन शब्दश्रवणेन अर्थप्रतीतिर्न जायते। येन च शब्देन अर्थसम्प्रत्ययः जायते तेन सर्वेषामर्थानां ज्ञानं न भवति। किन्तु कस्यचित् विशेषार्थस्यैव। एतेनावगम्यते यत् शब्दार्थयोः कश्चन सम्बन्धोऽस्ति, येन तत्तच्छब्देन तत्तदर्थस्यैवाबबोधः नान्यस्यार्थस्य बोध इति। स च सम्बन्धः नियतपदानां नियतार्थैः सहैव जायते। उक्तं परमलघुमञ्जूषाकारेण "**अत एव नागृहीतवृत्तिकस्य शाब्दबोधः**"[i]

अतः गृहीतसङ्केत एव शब्दः अर्थप्रत्यायकः न तु अगृहीतसङ्केतः। स च सङ्केतः शब्दार्थयोः कथं वर्तते इति विषये तन्नियामकाः निर्दिष्टाः शास्त्रविद्भिः तदुद्धृतं परमलघुमञ्जूषाटीकायां--

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।**

**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।** इति।[ii]

तत्र धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद् भवति। यथा – पाचकः, कारकः, धावकः इत्यादयः। पाचकशब्दस्य पाककर्ता इत्यर्थः। डुपचष् - पाके[iii] इति पाणिनेरनुशासनात् पच् धातोः पाकक्रियारूपार्थः। अत्रानुबन्धलोपोत्तरात्पच् धातोः "**ण्वुल्तृचौ**"[iv] इत्यनेन कर्त्रर्थेण्वुलि, अकप्रत्ययविधाने सति अकः अर्थः कर्ता भवति। "**कर्तरि कृत्**"[v] इत्यनेन तद्विधानात्।एवम्प्रकारेण उपमानकोशादयः अपि सङ्केतनियामकाः अपि अवगन्तव्याः। सर्वेषु नियामकेषु व्यवहारः तत्र सङ्केतग्राहकशिरोमणिरिति प्रसिद्धः।

एतद्रीत्या यत्रार्थे यस्य पदस्य सङ्केतो गृहीतो भवति, तदर्थनिरूपिता या शक्तिः तस्मिन् पदे तिष्ठतीति निश्चयः क्रियते। एवञ्च तत्तत्पदजन्यतदर्थविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तत्तत्पदनिष्ठवृत्तिज्ञानाधीनतदर्थविषयकोपस्थितिः कारणमिति कार्यकारणभावो निर्धार्यते। अत एव अगृहीतवृत्तिकस्य विस्मृतवृत्तिकस्य च शाब्दबोधः न जायते। एकसम्बन्धिज्ञानपरसम्बन्धिस्मारकं भवतीति नियमात् घटपदं श्रुतवतः आकाशस्मरणे जातेऽपि तत्राकाशविषयकः बोधः न जायते। तदुपस्थितेः वृत्तिज्ञानजन्यत्वाभात्।

अत्र विचारणीयमिदं यत् – शब्दादर्थबोधमापादयितुं यः सम्बन्धः स्वीकृतः तस्य स्वरूपं किमस्तीति। तत्र प्रथमं तावत् तार्किकाः एवं कथयन्ति - "**अस्माच्छब्दादयमर्थो बोद्धव्यः**" इत्याकारः"**इदं पदमिममर्थं बोधयतु**" इत्याकारा वा ईश्वरेच्छा शक्तिः लाघवात्। सैष सङ्केतः सम्बन्धः।[vi] अर्थात् ईश्वरेच्छा एव पदपदार्थयोः सम्बन्धः शक्तिः। यद्यपि उपर्युक्तेश्वरेच्छीयविषयता पदे अर्थे जन्यजनकसम्बन्धे बोधे च समानैवेति वाच्यवाचकयोर्वैपरीत्यमपि सम्भाव्यते तथापि बोधनिष्ठजन्यतानिरूपित-जनकताबोधविषयो वाच्यः इति स्वीकारेण न काप्यनुपपत्तिः न च ईश्वरसंकेतस्य शब्दार्थयोः सम्बन्धत्वे स्वीक्रियमाणे आधुनिकसंकेतस्थले बोधो नैव स्यादिति वाच्यम्। तत्र ईश्वरसङ्केतशब्दमपहाय केवलं संकेतमात्रमेव शक्तिरिति स्वीकारेण अदोषात्। सोऽयं सङ्केतः ईश्वरीयः आधुनिको वा स्यात्।

प्राचीनवैयाकरणैरपि शब्दे अर्थबोधजनकतां दृष्ट्वा तत्र बोधजनकत्वमेव शक्तिरिति अङ्गीकृतम्।

उपर्युक्तं तार्किकप्राचीनवैयाकरणानां मतमयुक्तम्। यतोहि सम्बन्धो हि सम्बन्धिभ्यां भिन्नः उभयाश्रितः विशिष्टबुद्धिनियामकश्च भवति।[vii] एवम्विधं सम्बन्धत्वमिच्छायां वक्तुं न शक्यते। तस्या आत्मवृत्तित्वेन शब्दार्थयोः अवर्तनात्। बोधजनकत्वस्य पदे वर्तमानत्वेऽपि अर्थेऽवर्तमानत्वेन उभयवृत्तित्वाभावात् न सम्बन्धत्वमिति। तस्मात् वैयाकरणैः शब्दार्थयोः सम्बन्धः वाच्यवाचकभावरूपो निरूपितः। तत्र शब्दः वाचकः अर्थश्च वाच्यः। तयोः सम्बन्धस्य ग्राहकमितरेराध्यासमूलकं तादात्म्यम्। तदेव सम्बन्धः सङ्केतः। तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् एवञ्च अर्थः शब्दाद्भिन्नाभिन्नः। तत्र योऽर्थो येन शब्देन भिन्नाभिन्नः स एव तेन शब्देन बोध्यते। सर्वेषामर्थानां सर्वैः शब्दैः सह तादात्म्यं नास्तीति सर्वैः शब्दैः सर्वेषामर्थानां बोधः न जायते। एवञ्च शब्देन अर्थस्याभिधाने सम्बन्धो हेतुः। उक्तं हि हरिणा –

**ज्ञानं प्रयोक्तुर्बाह्यार्थः स्वरूपं च प्रतीयते।**

**शब्दैरुच्चरितैस्तेषां सम्बन्धः समवस्थितः॥**[viii]

जिह्वाग्रोपाग्रमध्यमूलानां कण्ठताल्वादितत्तत्स्थानाभिघातरूपेण प्रयोगेण स्वानुरूपध्वनिभिः अभिव्यक्तैरान्तरैस्तत्तच्छब्दैः त्रितयं प्रतीयते – शब्दस्वरूपम्, बाह्योऽर्थः, प्रयोक्तुः पुरुषस्य ज्ञानमभिप्रायश्च। तत्र शब्देन

**International Journal of Research in Social Sciences**
Vol. 8 Issue 10, October 2018,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

प्रतीयमानेषु एषु त्रिषु शब्दस्वरूपं तु सर्वैः जनैः शक्तिग्रहं विनाऽपि अवश्यमव्यभिचरितं प्रतीयते। तदुक्तं हरिणा –

**प्रतिपत्तिर्भवत्यर्थे ज्ञाने वा संशयः क्वचित्।**

**स्वरूपेषूपलब्धेषु व्यभिचारो न विद्यते॥**[ix]

अस्यायम्भावः अर्थे ज्ञाने वा शक्तिग्रहाभावे प्रतिपत्तुः कदाचित् संशयो भवति। किन्तु शब्दस्वरूपोपलब्धौ कदाचिदपि व्यभिचारो न भवति। अपितु शब्दस्वरूपस्य प्रतिपत्तिर्भवत्येव। तदित्थं शब्दस्य शब्दस्वरूपस्य चअध्यासमूलको मुख्यः वाच्यवाचकभावः। शब्दार्थयोः अध्यासमूलको गौणः वाच्यवाचकभावः। तथा शब्दबौद्धार्थयोः अध्यासमूलकः कार्यकारणभावः इति त्रिविधेन सम्बन्धेन शब्दैः अर्थत्रितयं प्रतीयते। तत्र ये दार्शनिकाः बाह्यस्य अर्थस्य शब्दवाच्यत्वं नेच्छन्ति तेषां मतानुसारं वक्त्रभिप्रायारूढस्यैव मानसस्य शब्दार्थस्वीकारे तत्र तयोः कार्यकारणभावः सम्बन्धः।

यथाहुः –

**वक्तृव्यापारविषयो योऽर्थो बुद्धौ प्रकाशते।**

**प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम्॥**

बौद्धार्थे शब्द एव प्रमाणम्। स एव कारणम्। बाह्यसत्ताशून्यं तमर्थं स एव जनयति। अतस्तयोः कार्यकारणभावो विभावनीयः। एवञ्च शब्दार्थयोः अध्यासवशात् शब्देषु अनादिबोधयोग्यता वर्तते।

उक्तं हि हरिणा –

**इन्द्रियाणां स्वविषये ह्यनादिर्योग्यता यथा।**

**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा॥**[x]

अत एव योग्यता कार्यकारणभावश्चेति द्विविधः सम्बन्धपदार्थः व्यवतिष्ठते। तत्र योग्यता नाम शब्देषु वाचकत्वरूपा अर्थेषु च वाच्यत्वरूपा अवगन्तव्या। अत्रेदमवगन्तव्यं यत् स्वजन्यध्वनिभिः अभिज्वलितैः शब्दैः यदेतत् स्वरूपम्, बाह्यार्थः ज्ञानमिति त्रितयं प्रतीयते तत्र त्रयाणां भेदवृत्त्या पृथक् पृथक् प्रतीतिर्नजायते। किन्तु अभेदेनैव एकया वृत्त्या स्वरूपविशेषेण विशिष्टम् अर्थाभिधानमवतिष्ठते।

सङ्केतग्रहोऽपि अभेदे एव। अर्थात् बाह्यार्थप्रतिपिपादयिषायां स्वरूपार्थयोः सम्भेदेनैव अवभास इति नार्थात्पृथक् स्वरूपविमर्शः। अयं गौः(शब्दः), अयमर्थः इति इदम् इत्यनेन शब्दार्थयोः अभेदावसानात् स्वरूपमभिदधदेवं शब्दः अर्थमभिधत्ते इति विधीयते। स्वरूपाविवेकेनैव हि अर्थपरामर्शः अभिधानमुच्यते। बृद्धव्यहारात् तथैव सम्बन्धव्युत्पत्तेः। तथा हि – अयं गौरिति सङ्केतः क्रियते। घटशब्दस्य अयमर्थ इति भेदेन व्याख्यानेऽपि अयमिति शब्दादभेद एव व्यवह्रियते। यदा गौरित्युच्यते तदायं सास्नादिमानर्थो बोद्धव्यः इत्यत्रापि अयमिति अभेदेनैव परामर्शे सङ्केतप्रवृत्तिः। सङ्केतस्य फलं व्यवहारः। लौकिकव्यवहारे च शब्दार्थयोरभेदन प्रतीतिः। अतः शब्देन अर्थोऽभिधीयते अभेदेन स्वस्वरूपमिति अभिधीयते इति सिद्धम्।

यावद् व्यवहारमबाधितत्वेऽपि शब्दार्थयोरभेदो न वस्तुभूतः। किन्तु आध्यासिक एव। अपि च घट इति हि घटशब्देन अर्थवत् स्वरूपमभिधया एव विषयीक्रियते। यतो हि ज्ञानशब्दप्रदीपाः त्रयो हि प्रकाशाः येनैव प्रकाशेन परं प्रकाशयन्ति तथैव आत्मानमपि। ज्ञानमर्थं प्रकाशयति तथैव आत्मानमपि प्रकाशयति। एवं प्रदीपः रूपमाभासयन् आत्मानमपि आभासविषयभावोपगमेन प्रकाशयति। तथा शब्दोऽपि वाचकोऽर्थमभिधेयतया प्रकाशयन् आत्मानमभिधयैव प्रकाशयतीति उचितं न तु श्रोत्रेन्द्रियविषयभावोपगमेन। श्रोत्रेन्द्रियविषयभावोपगतः परावाक् आत्मनः स्पन्दरूपः शब्दस्तु वाचकः अतस्तस्य वाच्यता न भवितुमर्हति। तदुक्तं हरिणा –

**न च वाचकरूपेण प्रवृत्तस्यास्ति वाच्यता॥**[xi] इति

एवञ्च कृत्वा सर्वघटशब्दसाधारणं सामान्यरूपमर्थपक्षनिक्षिप्तमर्थसामानाधिकरण्यं शब्दस्वरूपमस्य वाच्यम्। तस्मिन् सामान्यरूपे एव सङ्केतः उपपद्यते। तेनैव अर्थस्य सामानाधिकरण्यम्। तथैव च व्यवहारे श्रोता प्रतिपद्यते। अत एव श्रोता स्वाभिप्रायानुसारेण शब्दस्वरूपाध्यस्तमर्थम् अवबुध्य वक्तुर्ज्ञानमपि तस्मिन् शब्दस्वरूपे एव अध्यस्यति। तथा च वक्तृगतं ज्ञानमपि शब्दः अध्यासेनैव प्रतिपादयति इति ज्ञानेऽपि परमार्थदृशा अध्यास एव सम्बन्धः। तदेवं स्पन्दभूतानि परिप्लवभूतानि परस्पराध्यस्तानि शब्दार्थज्ञानानि घट इत्येवमवगम्यते।

अत्र शब्दानुवेधः शब्दसंगर्गः इत्यस्मिन् विषये उक्तं हि हरिणा –

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**

**International Journal of Research in Social Sciences**
Vol. 8 Issue 10, October 2018,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**अनुबिद्धमिव ज्ञानं सर्वं शब्देन भासते।**[xii] इति

अत एव महाभाष्यकारस्य "अथ गौरित्यत्र कः शब्दः"[xiii] इति प्रश्ने शब्दार्थयोरध्यासरूपः अभेदप्रत्ययः भासते। ज्ञानस्यापि च शब्दे परस्पराध्यासो व्यवहारः। शब्देन स्वरूपाध्यस्तं वक्तृगतं ज्ञानमपि श्रोतरि अभिधयैव प्रतिपाद्यते। घटमानय इति नियुक्तः घटानयने अहमनेन प्रेषितः इति शब्दपूर्वकमेव प्रतिपद्यते। तदाह वार्तिककारः।

शब्दपूर्वको हि अर्थे सम्प्रत्ययः इति। एवञ्च शब्दः अर्थः तयोः अध्यासरूपः सम्बन्धश्च अनादिः। तदुक्तं भाष्यवार्तिकं "**सिद्धे शब्दार्थसम्बन्धे**" इति। शब्दे अर्थे सम्बन्धे च सिद्धे सति लोकव्यवहारः इति। एतन्मूलकमेव कालिदासमहाकविनाऽपि उक्तं रघुवंशे –

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**[xiv] इति।

---

[i] प॰ल॰मञ्जूषा पृ॰१२

[ii] प॰ल॰मञ्जूषा पृ॰३२

[iii] भ्वादि प्र धातुसंख्या १०६५, पृ॰सं॰ ४०३

[iv] पा॰सू॰ ३.१.१३३

[v] पा॰सू॰ ३.४.६७

[vi] प॰ल॰मञ्जूषा पृष्ठ १६

[vii] प॰ल॰मञ्जूषा पृ॰सं॰ १९

[viii] वाक्यपदीयम् – ३.३.१

[ix] वाक्यपदीयम् – ३.३.३

[x] वाक्य ३.३.२९

[xi] वाक्य ३.३.२६

[xii] वाक्य १.१३१

[xiii] म.भा.प.आ.पृ.सं.१२

[xiv] रघुवंश १.१